# Sri Rama Namavali from Ramaotsava Kalpalata

# श्रीरामोत्सवकल्पलतोद्धृता श्रीरामनामावलिः

## Document Information

Text title : rAmanAmAvalI from rAmotsavakalpalatA

File name : rAmanAmAvalIrAmotsavakalpalatA.itx

Category : raama, aShTottarashatanAmAvalI, nAmAvalI

Location : doc_raama

Transliterated by : lalitha parameswari parameswari.lalitha at gmail.com

Proofread by : lalitha parameswari parameswari.lalitha at gmail.com

Latest update : October 5, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# श्रीरामोत्सवकल्पलतोद्धृता श्रीरामनामावलिः

ॐ श्रीसीतारामचन्द्रपरब्रह्मणे नमः ।
श्रीराम नवरात्रोत्सव कल्पः
नामावलीस्त बकः ।
श्रीरामोत्सवकल्पलतोद्धृता श्रीरामनामावली

ॐ श्रीमद्गौरीश वागीश शचीशादि सुरार्चिताय नमः ।
ॐ पक्षीन्द्रगमनोद्धृत्त पाञ्चजन्यरवाञ्चिताय नमः ।
ॐ पाकारिमुखदेवौघ केकिलोक घनाघनाय नमः ।
ॐ परमेष्ठि मुखाम्भोज पद्मिनीवल्लभाकृतये नमः ।
ॐ शर्वहृत्कैरवोल्लास चन्द्रिकायित सुस्मिताय नमः ।
ॐ चक्राद्यायुधसंयुक्त चतुर्भुज समन्विताय नमः ।
ॐ गर्भीकृत भयामर्त्य निर्भीकरण पण्डिताय नमः ।
ॐ दानवारण्य संशोषदावीकृत निजायुधाय नमः ।
ॐ धरणीभारकृद्दैत्यदारणोद्यत निश्चयाय नमः ।
ॐ समानीकृतवैकुण्ठसाकेतपुर लोलुपाय नमः ।
ॐ प्राजापत्येष्टिसम्भूतपायसान्न रसानुगाय नमः ।
ॐ कोसलेन्द्रात्मजागर्भकरोद्भूत हरिन्मणये नमः ।
ॐ निर्विशेषगुणोपेतनिजानुज समन्विताय नमः ।
ॐ पङ्क्तिस्यन्दनसन्तोषपारावार सुधाकराय नमः ।
ॐ धर्मशास्त्रत्रयीतत्त्वधनुर्वेद विचक्षणाय नमः ।
ॐ यज्ञान्तरायसञ्जातायास कौशिकयाचिताय नमः ।
ॐ गुरुबोधितपित्राज्ञागुर्वीकरण पौरुषाय नमः ।
ऊ गाधेयबोधितोदारगाधाद्वयजितश्रमाय नमः ।
ॐ ताटकोरस्थलक्रौञ्चधराभृद्दारणाग्नि भुवे नमः ।
ॐ सृष्टानलास्त्र सन्दग्धदुष्टमारीचसोदराय नमः ।
ॐ समीरास्त्राब्धिसङ्क्षिप्तताटकाग्रतनूभवाय नमः ।

ॐ सत्रभागसमायातसुत्रामादि सुभिक्षकृते नमः ।
ॐ रूढक्रतुजमुन्मौनिगाढालिङ्गितविग्रहाय नमः ।
ॐ अहल्याशापपापाब्दिहारणोद्यतपद्रजसे नमः ।
ॐ शर्वबाणासनाद्रीन्द्र गर्वभञ्जन जम्भ घ्ने नमः ।
ॐ साक्षाद्रमावनीजातासाक्षतोदकरग्रहिणे नमः ।
ॐ दुर्वारभार्गवाखर्वगर्वदर्वीकराहिभुजे नमः ।
ॐ स्वस्वपत्नीसमायुक्त सानुजोदितभाग्यवते नमः ।
ॐ निजदारसमावेशनित्योत्सवितपूर्जनाय नमः ।
ॐ मन्थरादिष्ट कैकेयीमत्यन्तरितराज्यधुरे नमः ।
ॐ निषादवरपुण्यौघनिलिम्पद्रुफलोदयाय नमः ।
ॐ गङ्गावतरणोत्सृष्टशृङ्गिबेरपुराधिपाय नमः ।
ॐ भक्त्युत्कटपरिक्लुप्त भरद्वाजपदानतये नमः ।
ॐ चित्रकूटाचलप्रान्तचित्रकाननभूस्थिताय नमः ।
ॐ पादुकान्यस्त साम्राज्यभरवत्कैकयीसुताय नमः ।
ॐ जातकार्यागतानेक जनसम्मर्दनासहाय नमः ।
ॐ नाकाधिपतनूजातकाकदानवदर्पहृते नमः ।
ॐ कोदण्डगुणनिर्घोषघूर्णितायितदण्डकाय नमः ।
ॐ वाल्मीकिमुनिसन्दिष्टवासस्थलनिरूपणाय नमः ।
ॐ विराधशाल्मलीवृक्षविध्वंसानिलसंहतये नमः ।
ॐ निराकृतसुराधीशनीरेश शर भ ङ्काय नमः ।
ॐ अनसूयाङ्गरागाञ्चदवनीतनयान्विताय नमः ।
ॐ सुतीक्ष्णमुनि सं सेवासूचितात्मातिथिक्रियाय नमः ।
ॐ कुम्भजात दयादत्त जम्भारातिशरासनाय नमः ।
ॐ दण्डकावनसंलीनचण्डासुरवधोद्यताय नमः ।
ॐ प्राञ्चत्पञ्चवटीतीर पर्णागारपरायणाय नमः ।
ॐ गोदावरीनदीतोयगाहनाञ्चितविग्रहाय नमः ।
ॐ हासापादितरक्षस्त्री नासाश्रवण कर्त नाय नमः ।
ॐ खर सैन्याटवीपातसरयाभीलमारुताय नमः ।
ॐ दूषण त्रिशिरःशैलतुण्डनोग्रशरासनाय नमः ।
ॐ विरूपितानुजाकार विक्षोभितदशाननाय नमः ।
ॐ हाटकाकारसञ्छन्नताटकेयमृगद्विपिने नमः ।
ॐ सीतापराधदुर्मे धिभूतानुजविनिन्दकाय नमः ।

ॐ पं क्त्यास्याहतषक्षीन्द्र परलोकसुखप्रदाय नमः ।
ॐ सीतापहरणोध्बूतचिन्ताक्रान्तनिजान्तराय नमः ।
ॐ कान्तान्वेषणमार्गस्थकबन्धासुरहिंसकाय नमः ।
ॐ शबरीदत्त पक्काम्र ज्ञातास्वादकुतूहलाय नमः ।
ॐ पम्पासरोवरोपान्त प्राप्त मारुतिसंस्तुतयेनमः ।
ॐ श स्त प्रस्तावसामीरिशब्दसौष्ठवतोषिताय नमः ।
ॐ सिन्धुरोन्नतकापेयस्कन्धारोहणबन्धुराय नमः ।
ॐ साक्षीकृतानलादित्य कौक्षेयकपिसख्यभाजे नमः ।
ॐ पूषजानीत वैदेहिभूषालोकनविग्रहाय नमः ।
ॐ सप्ततालनिपातात्त सचिवामोदकोविदाय नमः ।
ॐ दुष्टदौन्दुभ कङ्कालतोलनाग्रपदङ्गुलये नमः ।
ॐ वालिप्राणानिलाहारवाताशननिभाम्बकाय नमः ।
ॐ कान्तराज्यरमारूढकपिराजनि षेविताय नमः ।
ॐ रुमासुग्रीववल्ली द्रुसुमाकरदिनायिताय नमः ।
ॐ प्रवर्षणगुहावास परियापितवार्षिकाय नमः ।
ॐ प्रेषितानुजरुद्धीत पौषानन्दकृदीक्षणाय नमः ।
ॐ सीतामार्गणसन्दिष्टवातापत्यार्पितोर्मि काय नमः ।
ॐ सत्यप्रायोपवेशस्थ सर्ववानरसंस्मृताय नमः ।
ॐ राक्षसीतर्जनाधूतरमणीहृदयस्थिताय नमः ।
ॐ दहनाप्लुतसामीरिदाहस्तम्भनमान्त्रिकाय नमः ।
ॐ सीतादर्शनदृष्टान्तशिरोरत्न निरीक्षकाय नमः ।
ॐ वनिताजीववद्वार्ताजनितानन्दकन्दलाय नमः ।
ॐ सर्ववानर सङ्कीर्णसैन्यालोकनतत्पराय नमः ।
ॐ सामुद्रतीररामेशस्थापनात्तयशोदयाय नमः ।
ॐ रोषभीष नदीनाथपोषणोचितभाषणाय नमः ।
ॐ पद्यानोचितपाथोधिपन्थाजङ्गालसैन्यवते नमः ।
ॐ सुवेलाद्रितलोद्वेलवलीमुखबलान्विताय नमः ।
ॐ पूर्वदेवजनाधीशपुरद्वारनिरोधकृते नमः ।
ॐ सरमावरदुर्दैन्यचरमक्षणवीक्षणाय नमः ।
ॐ मकरास्त्रमहास्त्राग्निमार्जनासारसायकाय नमः ।
ॐ कुम्भकर्णमदेभोरः कुम्भनिर्भेद केसरिणे नमः ।
ॐ देवान्तकनरादाग्रदीप्यत्संयमनीपथाय नमः ।

ॐ नरान्तकसुरामित्रशिरोधिनलहृत्करिणे नमः ।
ॐ अतिकाय महाकायवधोपायविधायकाय नमः ।
ॐ दैत्यायोधनगोष्ठीकभृत्यान्दकराह्वयाय नमः ।
ॐ मेघनादतमोद्भेदमिहिरीकृतलक्ष्मणाय नमः ।
ॐ सञ्जीवनीरसास्वादनजीवानुज सेविताय नमः ।
ॐ लङ्काधीशशिरोग्रावटङ्कायितशरावलये नमः ।
ॐ राक्षसीहारलतिका लवित्रीकृतकार्मुकाय नमः ।
ॐ सुनाशीरारिनासीरघनोन्मूलकराशुगाय नमः ।
ॐ दत्तदानवराज्य श्री धारणाञ्चद्विभीषणाय नमः ।
ॐ अनलोत्थित वैदेहीघनशीलानुमोदिताय नमः ।
ॐ सुधासारविनिष्यन्धयथापूर्ववनेचराय नमः ।
ॐ जायानुजादिसर्वाप्तजनाधिष्ठित पुष्पकाय नमः ।
ॐ भारद्वाजकृतातिथ्यपरितुष्टान्तरात्म काय नमः ।
ॐ भरतप्रत्यया षेक्षापरिप्रेषीतमारुतये नमः ।
ॐ चतुर्धशसमान्तात्तशत्रुघ्नभरतानुगाय नमः ।
ॐ वन्दनानन्दितानेकनन्दिग्रामस्थमातृकाय नमः ।
ॐ वर्जितात्मीयदेहस्थवानप्रस्थजनाकृतये नमः ।
ॐ निजागमनजानन्दस्वजानपदवीक्षिताय नमः ।
ॐ साकेतालोकजामोदसान्द्रीकृतहृदस्ताराय नमः ।
ॐ भरतार्पितभूभारभरणाङ्गीकृतात्मकाय नमः ।
ॐ मूर्धजामृष्टवासिस्ठमुनिपादरजःकणाय नमः ।
ॐ चतुरर्णवगङ्गादिजलसिक्तात्म विग्रहाय नमः ।
ॐ वसुवासववाय्वग्निवागीशाद्यमरार्चिताय नमः ।
ॐ माणिक्यहार केयूरमकुटादिविभूषिताय नमः ।
ॐ यानाश्वगजरत्नौघनानोपपायनभाजनाय नमः ।
ॐ मित्रानुजोदितश्वेतच्छत्रापादितराज्यधुरे नमः ।
ॐ शत्रुघ्न भरताधूतचामरद्वयशोभिताय नमः ।
ॐ वायव्यादिचतुष्कोणवानरेशादि सेविताय नमः ।
ॐ वामाङ्काङ्कितवैदेहीश्यामारत्नमनोहराय नमः ।
ॐ पुरोगतमरुत्पुत्रपूर्वपुण्यफलायिताय नमः ।
ॐ सत्यधर्मदयाशौचनित्यसन्तर्पितप्रजाय नमः ।
ॐ यथाकृतयुगाचारकथानुगतमण्डलाय नमः ।

ॐ चरितस्वकुलाचारचातुर्वर्ण्यदिनाश्रिताय नमः ।
ॐ अश्वमेधादिसत्रान्नशश्वत्सन्तर्पितामराय नमः ।
ॐ गोभूहिरण्यवस्त्रादिलाभामोदितभूसुराय नमः ।
ॐ माम्पातुपात्विति जपन्मनोराजीवषद्वदाय नमः ।
ॐ जन्मापनयनोद्युक्त हृन्मानससितच्छदाय नमः ।
ॐ महागुहाजचिन्वानमणिदीपायितस्मृतये नमः ।
ॐ मुमुक्षु जनदुर्दैन्यमोचनोचितकल्पकाय नमः ।
ॐ सर्वभक्त जनाघौघसामुद्रजल बाडबाय नमः ।
ॐ निजदासजनाकाङ्क्षनित्यार्थ प्रदकामदुघे नमः ।
ॐ साकेतपुरसंवासिसर्वसज्जनमोक्षदाय नमः ।
ॐ श्रीभूनीलासमाश्लिष्ट श्री मदानन्दविग्रहाय नमः ।

इति श्रीरामोत्सवकल्पलतोद्धृता श्रीरामनामावलिः समाप्ता ।

Encoded and proofread by lalitha parameswari parameswari.lalitha at gmail.com

---

*Sri Rama Namavali from Ramaotsava Kalpalata*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*